# भूमिका

- योगस्य महत्त्वम्, योगस्य उद्देश्यम्।
- योगस्य उपादेयता, अमृतविद्यायोगः।
- योगदर्शनस्य परम्परानिर्देशनम्।
- श्रीकृष्णवल्लभाचार्यस्य व्यक्तित्वं कृतित्वञ्च।

# भूमिका

**योगस्य महत्त्वम् -**

विश्वेऽस्मिन् समुपलभ्यमानेषु निखिलेष्वपि समुत्पन्ना समस्या समाधानोपायभूतेषु नास्ति। किमप्येतादृशं साधनं योगातिरिक्तं यदुभयथा सिद्धिं स्यात्। योगदर्शनं तु न केवलं जनजीवनाय समपेक्षिता: समावश्यकता: सम्पूरयितुमेव कल्पवृक्षतामावहत्यपि लोकोत्तरांश्चापि भोगान् निखिला विभूतिश्च प्रयच्छति परवैराग्याभ्याम् साम्यां विवकेख्यातिमापादयञ्च परं कैवल्यमपि प्रस्तौत्येव। देशे-देशे गेहे गेहे च विद्यमानाञ्च नानाम्पुरस्तात् समुपस्थिता: समवलोक्यन्ते बहव्य: समस्या:। समुपस्थितानामेतासन्निखिलानां समस्यानां समाधानाय स्वां स्वां शक्तिं समनुसृत्य सर्वोऽपि जन: श्रमपूर्वकं भृशम्प्रयतते केन्द्रीयसर्वकार प्रान्तीयासर्वकाराश्चापि यावच्छक्यं सहायमपि कुर्वन्त्येव, परमेकस्या: समस्याया: समाधाने सदुपायामापत्तभिन्नास्ततोऽपि ज्यायस्यो वा चेतसो अन्या: समस्या: समुपतिष्ठन्ते यावतसामपि समाधानाय समवहिता भवन्ति तावदन्या: काश्चन् सामान्यमपि जनजीवनं सर्वथा समानन्दो ललितं विदधति। योगेन प्रारब्धकर्माशय वासानानामपि परिक्षये जाते सुविच्छया सन्मुक्तिश्चापि अधिगंश्यते। प्रोच्यते यदिह निखिला

समस्यासमाधानाय सर्वजनहिताय, सर्वजनसुलभाय च योगमार्गेण श्रमाश्रणीय। यद्यपि वर्तमाने योगाङ्गेषु यमनियमयोर्द्वयाश्चापि परिपालनं स्याद् तदापि सुनिश्चितरूपेण दु:खानां समाधानं स्यात्। उक्तञ्च -

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**

**युक्तस्वप्नावबोधस्य योगो भवति दु:खहा।।**[1]

अत एव योग: कथं परिपालनीयं साम्प्रतं वर्तमानासु समस्यासु खाद्यान्न समस्या वृत्यालाभायसमस्या देशरक्षासमस्या स्वास्थ्यसुरक्षासमस्या भ्रष्टाचारसमस्या प्रभृतय: समस्या सर्वेषामपि जनानाम्मनांसि व्याकुलीक्रियमाणानि समवलोक्यन्ते। विचाराचराणां मतमिति समस्यानामेतासां समाधानं वर्तते सर्वथा समभीप्सितम्। यद्यपि त्रिगुणात्मकमस्मिन् संसारे सत्त्वरजस्तमसां भावत: सुख-दु:ख-मोहा: सन्त्येव। यावच्चैतज्जगद् वर्तते तावत्तेषां स्थिति: भविष्यत्यपि तथापि साम्प्रतं यावद् दु:खान्येतान्याध्यात्मिकाधिभौतिकाधिदैविकानि, तावद् दु:खा कर्तुन्न प्रभवेयुस्तथा च क्रमशो विवेकख्यातिमधिगम्य सर्वथैव दु:खानामेतेषाम्प्रपञ्चान् मुक्ता भवितुं प्रभवेम्, इत्येतदर्थमपि सर्वथास्माभि: योगपन्था: समाश्रयणीय एव।

---

[1] श्रीमद्भगवद्गीता. 6/17

**योगेन व्याधिनिवारणम्-**

योगशास्त्रं हि मानवस्य सर्वतो सर्वाङ्गीणोन्नते तथा लौकिकपारलौकिकोभयविधा कल्याणस्य कारणम्। तथा तादृशीमेव जीवनचर्यामुपदिशति, अतो यदि योगशास्त्रं दैनन्दिन जीवनस्याङ्गभूतमिति मत्वा तदनुसारिणी योगचर्या यदि कश्चिदाचरति तदा स: सर्वदा जीवने स्वस्थं एव तिष्ठति दीर्घजीवनं च प्राप्नोति। रोगास्तस्य नश्यन्ति।

पाश्चात्यसिद्धान्तानुसारेण यथा प्रवृत्तिर्दृश्यते यद्यपिरोगाणां सम्प्राप्तिरेव भवेत् तदनन्तरं तेषां चिकित्सा विधेया। परन्तु भारतीयदशर्नस्यानुसारेण योगशास्त्रस्यायुर्वेदशास्त्रस्य चायं दृढ़तमो सिद्धान्त:।

यद्रोगाणां सम्प्राप्तिरेव यथा न भवेत्तथा आचरणीयं तथा व्यवहरणीयम्। अतो मानवस्य जीवनं एव तादृशी भवेद् येन स: कदापि कथमपि रुग्णो न स्यात्। अतैव आयुर्वेदशास्त्रस्य प्रयोजनम्। पूर्व 'स्वस्थस्य स्वास्थ्यलक्षणम्'। तदनन्तरं यदा कदाचित् मिथ्याहारविहारेण यद्यातुर: स्यात्तदा 'विकारप्रशमनम्' इति प्रतिपादितम्। योगे च मिथ्याहारविहारस्य सर्वथा परिहारं एव हठयोगादिग्रन्थेषु प्रतिपादित:। तत्राहारविहारकृते भूयान् विचार योगोपनिषदत्सु वेदेषु तथा प्रायश: सर्वेष्वपि राजयोगहठयोगादि ग्रन्थेषु कृतो वर्तते। अतैवायुर्वेद औषधास्यापि द्वैविध्यं प्रतिपादितम्। एकम् ''स्वस्थस्योर्जस्करम्'' द्वितीयं ''आतुरस्य रोगनाशकरम्''। भारतीय शास्त्रेष्वाहारविषये तस्य प्रतिकूलतानुकूलता विषये सर्वे:

स्वप्रकृतिमानुकूलमेवाहारं भवितव्यमिति विषये बहुशो बहुविचार: कृत: शास्त्रेषु। यतोहि आहारनियमनैव रोगाणां सम्प्राप्तिरवरुधयते। अयञ्चापरोऽपि पूर्णविचारणा कृता वर्तते यतोहि शरीरमनसो उभयो: परस्परापेक्षत्वं स्वीकृतम्। यतोहि मनस: स्वास्थ्यं शरीरस्वास्थ्यं विना न सम्भवति। अतो आधुनिकमनोविज्ञानेन अपि प्राणिन: सर्वा: क्रिया: मनोशारीरिकी क्रिया: उच्यते। अतैव योगशास्त्रेषूभयविधस्वस्थतायै: यमनियमाद्यष्टांगयोगानां विधानं कृतम्। यतोहि मोक्षसाधनामात्मसाक्षात्कारसाधना वाऽन्यापि काचन् क्रिया अस्वस्थेन शरीरेण कर्तुं न शक्यते। अत "आसनेन रुजं हन्ति" प्राणायामैश्च मनस स्वास्थ्यं लभन्ते, तथा सदाचारणेन ध्यानाभ्यासादिनाम्ना दोषसाम्यता अतैवायुर्वेद लभ्यते, अतैवायुर्वेदे स्वस्थस्य परिभाषैव रुपेण कृता वर्तते यत् तस्य वातपितकफश्चेति त्रयो धातव: दोषा: वा समा: जठराग्निश्च यस्य सम्यक् क्रियाशीला तथा धातुमलादिनां क्रिया यस्य शरीरे सम्यक् रुपेण प्रचलति तथात्मेन्द्रियमनसां प्रसन्नता यस्य विद्यते सैव स्वस्थ इत्युच्यते। अस्य कारणमेतदेव यत् जीवितस्य परिभाषा आयुर्वेदे योगानुसारेणाचापि -

**'शरीरेन्द्रियसत्त्वात्मसंयोगे धारि जीवितम्।**[2]

अस्मिन् विषये मनुना प्रोक्तं यत् ऋषयो दीर्घसन्धयत्वात् प्रतिदिनं सन्ध्योपासनेन दीर्घजीवनमवाप्नुयु:।

---

[2] चरकसूत्रम् 1/42

वर्तमाने योगस्य महत्त्वं बहुधा दृश्यते, आसनेन प्राणायामेन नेका: दुर्गमकण्टकादि रोगा: नश्यन्ति। सम्पूर्णदशे योगस्य प्रचारप्रसारं च भवति विद्यालयेषु विश्वविद्यालयेषु नेकेषु संस्थानेषु योगकेन्द्रा संस्थापिता वर्तन्ते। सम्प्रतियोगाचार्येण रामदेवमहोदयेन उत्तराखण्डस्थितहरिद्वारे पतंजलियोगपीठम् स्थापितम्। यत्र-तत्र सर्वत्र योगप्रशिक्षणं केन्द्राणां आयोजनं तै: क्रियते। दिल्लीनगरे मोरारजीदेसाईयोगकेन्द्रम्, केन्द्रीययोगप्राकृतिकचिकित्सानुसंधानपरिषद्श्च भारतसर्वकारेण संस्थापिता। श्रीलालबहादुरराष्ट्रियसंस्कृतविद्यापीठेऽपि योगविज्ञानकेन्द्रमस्ति, तत्राऽपि स्नातकोत्तर योगप्रशिक्षणं भवति। तत्र छात्राणां कृते योगस्य गहनं महत्त्वं बोधयन्ति। देशेऽस्मिन् चिकित्साविज्ञानेनापि योगमहत्त्वं स्वीकृतम्। एवं प्रकारेण योगस्य महत्वं न केवलं भारतीया: अपितु वैदेशिका: अपि स्वीकृतवन्त:। विदेशेष्वपि योगकेन्द्राणि वर्तन्ते तत्र असंख्यजना: योगपथमाचरन्ति स्वस्था च भवन्ति। शाकाहारभोज्यविषयेऽपि योगस्य महत्वं वर्तते। न केवलं भारतदेशे अपितु कनाड़ा, अमेरिका, ब्रिटेन इत्यादिषु देशेषु सहस्रा: जना: योगाभ्यासादनन्तरं मांसाहारं परित्यज्य शाकाहारपथमाचरन्ति। कथनस्यास्यतात्पर्यमिदमस्ति योग: औषधि: वर्तते शारीरिकं मानसिकं रोगनिवारणाय च सहायक:।

**योगस्य उद्देश्यम्,**

योगदर्शनस्य उद्देश्यम् आध्यात्मिक-आधिभौतिक-आधिदैविकञ्चेति तापत्रयस्य ऐकान्तिकात्यान्तिकी च निवृत्तिरेव। यतः अविद्या एव सर्वेषां क्लेशानां मूलजननी। सा एव अविद्या क्वचित् विपर्यय इति नाम्ना क्वचिच्च वेदान्तादिदर्शनेषु माया नाम्ना वर्ण्यते।

अविद्यादयः पञ्चक्लेशा एव प्रमाणाविपर्ययविकल्पादिवृत्तिरूपेण चित्तभूमौ शेते। एते एव कर्माशय इति नाम्ना व्यवह्रियन्ते। कर्माशये स्थिताः संस्काराः प्रसुप्ततनुविछिन्नो-दारभेदेन चतुरवस्थावन्त भवन्ति। तत्र रागस्य वृत्तिरूपेण समुदाचाराकाले द्वेषवृत्तिः प्रसुप्त इव तिष्ठति। क्रियाशीला न भवति। यथा भूमौ निक्षिप्तं बीजम् आर्द्रतां तथा उष्णतां विना अङ्कुरितं न भवति, तत् प्रसुप्तावस्थायां भूमौ तिष्ठति, तथा संस्काराः क्रियायोगेन यदा क्षीणाः दुर्बलाः वा भवन्ति तदा ते तनव इति उच्यन्ते। विच्छिन्नाः संस्कारा एवमेव छिन्नाः खण्डशः जायन्ते। यथा वर्षतौ प्रबलवातप्रकोपेन मेघाः विछिन्नाः भवन्ति। एषा एव विछिन्नावस्था। उदारावस्थायां संस्काराः अनुकूलपरिस्थितौ उद्दीपकदृश्याणामालम्बनदृश्याणां वा सम्मुखीभावे कार्योन्मुखता-मापद्यन्ते। यथा भूमौ निक्षिप्तानि बीजानि स्वानुकूलसूर्यतापेन समुचितसिञ्चनेन वा ऋतौ अनुकूलतायां अङ्कुरितानि भवन्ति। एवमेव चित्तभूमौ संस्काराः लब्धावकाशाः सन्तः कार्यक्षमाः जायन्ते।

योगदर्शनं हि साधनापरं क्रियापरञ्च। क्लेशानां विभेदनाय अनेके उपाया अस्मिन् शास्त्रे वर्णिता:। क्लेशानां तनुकरणार्थं योगदर्शनस्य द्वितीयपादे क्रियायोग: उपदिष्ट:। क्रियायोगेन तनुकृता: क्लेशा: तेषां संस्काराश्च ध्यानयोगाभ्यासेन हेया: जायन्ते। तत: **'ते प्रतिप्रसवहेया: सूक्ष्मा:'**[3] इति सूत्रानुसारेण समाध्यवस्थायां यदा क्लेशानामतिसूक्ष्मावस्था भवति, तदनन्तरं विवेकख्यातिरूपाग्निना क्लेशानां दग्धबीजभावावस्था सम्पाद्यते।

योगस्य उद्देश्यं चित्तवृत्तीनां पूर्णत: निरोध एव। अतएव **'योगश्चित्तवृत्तिनिरोध:'**[4] सूत्रेण महर्षिणा पतञ्जलिना योगस्य लक्षणम् उद्भावितम्। योगोद्देश्यम्, फलं वा तत्रैव तृतीये सूत्रे - **'तदा द्रष्टु: स्वरूपेऽवस्थानम्'**[5] इति प्रतिपादितम्। द्रष्टु: पुरुषस्य स्वरूपेऽवस्थानमेव अथवा स्वस्वरूपावस्थाप्राप्तिरेव योगस्य उद्देश्यम्।

योगदर्शनस्य प्रत्येके पादे योगस्य किं उद्देश्यम् इति शब्दभेदेन प्रतिपादितम्। यथा प्रथमपादे **'तदा द्रष्टु: स्वरूपेऽवस्थानम्'** इति सूत्रेण योगस्य उद्देश्यं प्रतिपादितम्। साधनापादे योगस्य उद्देश्यं निरूपितम् **'तदभावात्संयोगाभावो हानं तद् दृशे: कैवल्यम्'**[6] इति सूत्रेण योगस्य उद्देश्यं प्रतिपादितम्। **'द्रष्टदृश्ययो: संयोग एव**

---

[3] पातञ्जलयोगसूत्रम् 2/10

[4] पातञ्जलयोगसूत्रम् 1/2

[5] पातञ्जलयोगसूत्रम् 1/3

[6] पातञ्जलयोगसूत्रम् 2/25

**हेयहेतु:"**[7] इति प्रतिपादितम्। एष संयोगोऽनादि:। तथा तस्मिन् संयोगे पुरूषार्थ एव हेतु:। यदि एष संयोगो निवर्तते तदा दु:खस्य कारणान्यपि नश्यन्ति।

योगदर्शनस्य विभूतिपादेऽपि अन्तिमे सूत्रे योगस्य लक्ष्यं सम्यक् निरूपितम्। तथा च **'सत्त्वपुरुषयो: शुद्धिसाम्ये कैवल्यम्'**[8] इति पतञ्जलि: सूत्रम्। सूत्रानुसारेण पुरुषे उपचरितानां भोगानां यदा अभावो जायते तदा एव सत्त्वपुरुषयो: शुद्धि: विवेकख्यातिर्वा लभ्यते। एषा एव कैवल्यावस्था। तदा पुरुष: स्वरूपमात्रज्योति: निर्गुण:, निर्मल:, केवली च भवति, बुद्धिगता: क्लेशा: विवेकख्यात्या नश्यन्ति। एवं प्रकारेण बुद्धे: पुरुषस्य उभयोरेव शुद्धौ पृथक्-पृथक् रूपेण अवस्थितौ सत्यां कैवल्यलाभ: जायते।

कैवल्यपादस्य अन्तिमसूत्रेणाऽपि कैवल्यस्य स्वरूपं योगस्य उद्देश्यञ्च प्रतिपादितम्। एतदनुसारेण पुरुषार्थरहितानां सत्त्वादिगुणानां चरिताधिकाराणां सतां तेषां अव्यक्तप्रकृतौ प्रतिप्रसव: लयो वा जायते। एतदेव कैवल्यम्।

अत: कैवल्यप्राप्तिरेव योगस्य उद्देश्यं पुरुषस्य सदा एकाकित्वम्, केवलत्वम्, निरुपादिकत्वञ्च इति रूपेण अवस्थानामेव कैवल्यम्। अविप्लवा विवेकख्याति: यदा दृढा भवति तदा जीवनावस्थायामेव वर्तमान एव शरीरे कैवल्यावस्थाऽनुभूयते। सा

---

[7] पातञ्जलयोगसूत्रम् 2/17

[8] पातञ्जलयोगसूत्रम् 3/55

अवस्था जीवन्मुक्तिरिति उच्यते। प्राप्तविवेकख्यातेः योगिनः प्रारब्धकर्मः समाप्त्यनन्तरं शरीरपातो जायते। तदा विदेहमुक्तिः विदेहकैवल्यं वा लभ्यते।

श्रीमद्भगवद्गीतायामपि भगवता श्रीकृष्णेन दुःखसंयोगनिवृत्यर्थं योगस्य ज्ञानं, योगाभ्यासेव उपादेयः, तेन च योगयुक्तेन भाव्यमिति उपदिष्टम्।

अनेन प्रकारेण **योगो भवति दुःखहा**[9] इति भगवद्वचनानुसारेण सर्वेषां दुःखानाम् आत्यन्तिकी ऐकान्तिकी निवृत्तिरेव योगस्य उद्देश्यम्।

---

[9] श्रीमद्भगवद्गीतायां 6/17

**योगस्य उपादेयता-**

युगेऽस्मिन् योगशास्त्रस्य उपयोगिता सम्पूर्णे चराचरे दृष्टिगोचरं भवति। सर्वाणि शास्त्राणि शास्त्रस्य अस्य उपयोगिता निर्विरोधरूपेण स्वीकृतानि। न केवलं भारतदेशे अपितु विश्वेऽस्मिन् योगं औषधरूपेण स्वीकृतम्। दूषितेऽस्मिन् वातावरणे योगशास्त्रं प्रति सर्वेषां जनानां लोकप्रियता नितान्तं वर्धते।

यावत् प्रकृतिविकृतीनां साक्षात्कारो न भवति तावत् संसाराद् वैतृष्ण्यं न जायते। ध्यानयोगेन जगत अनित्यत्वं प्रत्यक्षीक्रियते। तदैव योगी सर्वमिदं स्वप्नवत् पश्यति। तत्र वेदान्तमनुपश्यति ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापर:।

गीतायां आत्मदर्शनं सात्त्विकसूक्ष्मबुद्धया सम्भवतीति प्रतिपादितम्।

**नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना।**[10]

समाधे: दृढतराभ्यासेन सूक्ष्मबुद्धि: प्रज्ञायते। सूक्ष्मबुद्धे: स्वरूपं योगशास्त्रे ऋतम्भरा तत्र प्रज्ञा इति नाम्ना अभिहिता। ऋतम्भरया प्रज्ञयैव भ्रमाज्ञानयो: नाशो भवति। अयोगिनां सूक्ष्मबुद्धि: ज्ञानञ्च नोत्पद्येते। ऋतम्भराप्रज्ञाजन्य विवेकख्यातिना अज्ञानग्रन्थिविभेदेनं योगदर्शने श्रूयते।

भक्तिप्रधानजना: केवलं भक्तेर्महिमानं गायन्ति। योगस्य उपेक्षाहेयत्वं च प्रतिपादयन्ति। तेषां मते भक्तिं विना परमात्मदर्शनं न कर्तुं शक्यते। परं इदं न

[10] श्रीमद्भगवद्गीता 2/66

विस्मरणीयं यत् भक्तेरुदय: चित्तशुद्धिं विना न सम्भवति। विष्णुधर्मोत्तरपुराणे वचनमिदं यदनेकजन्मकृततपोज्ञानसमाधिभिर्भक्त्युदयो भवति।

योगदर्शने भक्तिमार्गस्यापि सन्निवेश: क्रियायोगे तप:स्वाध्यायेश्वरप्राणिधानानां समावेश:।

**तप:स्वाध्यायेश्वरप्रणिधानानि क्रियायोग:।**[11]

एते समाधिभावनार्थं क्लेशतनूकरणाय च क्रियते। ईश्वरप्रणिधानं भक्ते: पराकाष्ठास्ति। ईश्वरे परमगुरो: सम्पूर्णकर्मणा तत्फलानां च समर्पणं ईश्वरप्रणिधानम्। ईश्वरप्रणिधानं समाधिसिद्धेरुपायत्वेनापि निरूपितमस्ति।

**समाधिसिद्धिरीश्वरप्रणिधानात्।**[12]

श्रद्धा भक्तेरपरं नामधेयम्। योगदर्शने श्रद्धाया: महनीयं स्थानं विद्यते। श्रद्धा मातृवत् कल्याणी योगिनं पाति।

**श्रद्धा: जननीव कल्याणी योगिनं पाति।**[13]

वस्तुतस्तु भक्ति:, ज्ञानं, क्रिया एते योगाङ्गानि। योगशास्त्रे मया प्रोक्ता: भक्तिज्ञानक्रियात्मका: इति विष्णुपुराणे भगवद्वचनम्। श्रुतिषु श्रद्धाभक्तिध्यानयोगाऽत्मदर्शनोपायत्वेन वर्णिता:।

---

[11] पातञ्जलयोगदर्शनम् 2/1

[12] पातञ्जलयोगदर्शनम् 2/45

[13] व्यासभाष्यम् 1/20

**श्रद्धा: भक्ति: ध्यानं योगदवेहि।**[14]

योगदर्शने उपायप्रत्ययवतां योगिनां कृते श्रद्धा प्रथमोपायत्वेन उपदिष्टा।

**श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम्।**[15]

श्रद्धाया: पराकाष्ठायोगेन समुपजायते। यावत् योगध्यानेन परमात्मविभूतिं न वेत्ति तावत् अविकम्पश्रद्धा योगश्च नोत्पद्यते।

**एतां विभूतीं योगं च मम यो वेत्ति तत्त्वत:।**

**योऽविकम्पेन योगेन युज्यते नात्र संशय:।।**[16]

गीतायां भगवता श्रीकृष्णेन अनन्ययोगेनैव अव्यभिचारिणी भक्तिरुपजायते इत्युक्तम्।

**मयि चानन्ययोगेन भक्तिरव्यभिचारिणी।**[17]

पराभक्तिध्यानयोगेन आवृत्तचक्षुसा समुपलब्धुं शक्यते। परमात्मदर्शनं नित्ययुक्तस्य योगिन: सुलभम् इति गीतावचनम्। साधक: येन केनापि मार्गेण साधनं करोतु किन्तु सर्वेषां कृते चित्तसमाधानमावश्यकम्। पश्यन्ति युक्ता मनसा मनीषिण इति वचनेन युक्तमन: परमतत्त्वदर्शनाय कल्पते।

---

[14] कैवल्योपनिषदम् 1/2

[15] योगसार: 20

[16] श्रीमद्भगवद्गीता 10/7

[17] श्रीमद्भगवद्गीता 13/10

**अमृतविद्यायोग:** –

उपनिषत्सु गीतादियोगग्रन्थेषु योगविद्या, आध्यात्मविद्या, पराविद्या, ब्रह्मविद्या इत्यादिनामाभिधीयते। योग एव अनिश्वरं दिव्यजीवनम्। योगारूढ: पुरुष: मुक्तिपर्यन्तम् आध्यात्मिक्यै उन्नत्यै साधनां करोति। यदि पुरुष: योगाभ्यासे सततं प्रवर्तते तर्हि तस्य अमृतरूपिणी एषा योगविद्या जन्ममृत्युं नाशयितुं समर्थ: भवति। योगविद्यातिरिक्ता अन्या: विद्या शरीरनाशेन सह नष्टप्राया: भवन्ति। परन्तु योगविद्या न नश्यति। यत: यावत् पर्यन्तम् अभ्यास: वर्तमानजन्मनि कृत: तदग्र एव अग्रिमजन्मनि कर्तुं पार्यते।

**'स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्'**[18] इति गीतावचनानुसारेण योगधर्मस्य स्वल्पोऽपि अभ्यास: महतो भयात् मुक्तिं प्रयच्छति। **'इमं विवस्वते योगं प्रोक्तवानहमव्ययम्'**[19] इत्युक्त्वा भगवता श्रीकृष्ण योगस्य अविनाशित्वं सूचितम्। योगसाधक: यदि साधनामध्यकाले शरीरं विसृजति तदा अग्रिमजन्मनि यावत् तेन साधना विहिता तद् पुनरपि कर्तुं नावश्यकम्। ततोऽग्रिम एव साधनाया: विधानं तस्य कृते शास्त्रेषूपदिष्टम्। अत एव गीतायां **'लभते पौर्वदेहिकम्'**[20] इति वाक्येन अस्य सिद्धान्तस्य पुष्टि: क्रियते। योगदर्शने **'भवप्रत्ययो विदेहप्रकृतिलयानाम्'**[21] इति।

---

[18] श्रीमद्भगवद्गीता अ. 2/40

[19] श्रीमद्भगवद्गीता अ. 4/1

[20] श्रीमद्भगवद्गीता अ. 12/7

[21] पातञ्जलयोगसूत्रम् 1/19

सूत्रेण एतदेव प्रतिपादितम्। योगसंस्काराणां चित्ते संप्रमोष: न भवति। यतोहि ध्यानजन्या: इमे संस्कारा:। योग एव परममुक्ते: मार्ग:।

श्रुतिषु समाधिसिद्धस्य एकस्मिन्नेव जन्मनि आत्मज्ञानप्राप्तेरूदघोष: प्राप्यते। योगात् परतर: मोक्ष प्रदाता अन्यो मार्ग: नास्ति।

**ज्ञानं तु जन्मनैकेन योगादेव प्रजायते।**

**तस्माद्योगात् परतरो नास्ति मार्गस्तु मोक्षद:11**[22]

अहं मुक्त: इत्येवं तावत् मनसि विचारणेनैव केवलं तस्मिन्नेव क्षणे मुक्तिर्न भवति। मननपूर्वकमनोजन्यपर्यन्तम् अभ्यासात् योगसमाधौ सिद्धयामेव प्राधिन्य: मुक्तिर्जायते। तदनन्तरं तस्य पुनर्जन्मापि न भवति।

**प्रविचार्य पुन: ज्ञानं ज्ञानं मुक्तोऽहमिति मन्यते।**

**किमसौ मननादेव मुक्तो भवति तत्क्षणात्।।**

**पश्चाज्जन्मान्तरशतैर्योगादेव विमुच्यते।**

**न तथा भवतो योगाज्जन्ममृत्युपुन: पुन:।।**[23]

अन्यत्रापि योगात् परतरं न किमपि कल्याणकरं, न किमपि सूक्ष्मं तत्त्वम् इति कृत्वा योगात् परतरं किञ्चिनास्ति इति शास्त्रेषु बहुश: प्रतिपादितम्।

---

[22] योगशिखोपनिषद् 1/53

[23] योगशिखोपनिषद् 1/54-55

**योगात् परतरं पुण्यं योगात् परतरं शिवम्।**

**योगात् परतरं सूक्ष्मं योगात् परतरं न हि।।**[24]

गीतायामपि योगी परमस्थानं उपैति चाद्यम् इत्युक्त्वा स्पष्टरूपेण योगस्य एव मोक्षकरत्वं प्रतिपादितम्। अमृतत्त्वस्य प्राप्तिरेव योगस्य चरमावस्था। सा च निर्विकल्पसमाधि: न लभ्यते।

यथा काष्ठस्याग्नि: मन्थनं विना नाभिव्यजते एवमेव योगं विना परमपदस्य प्राप्तिर्न भवितुमर्हति।

यथा घटस्थो दीप: घटाद् बहि: प्रकाशनं कर्तुं न समर्थ: एवमेव योग: समाधिं विना परमपदस्य साक्षात्कार: न भवितुमर्हति।

**समाधिमेकेन सममममृतं यान्ति योगिन:।**

**यथाग्निर्दारूमध्यस्थो नोत्तिष्ठेन्मन्थनं विना।।**

**विना चाभ्यासयोगेन ज्ञानदीपस्तथा न हि,**

**घटमध्यगतो दीपो बाह्ये नैव प्रकाशते।**

**भिन्ने तस्मिन् घटे चैव दीपज्वाला च भासते,**

**स्वकायं घटमित्युक्तं यथा दीपो हि तत्पदम्।।**[25]

---

[24] योगशिखोपनिषद् - 1/67

[25] योगकुण्डलिनोपनिषद् अ. 3/14-16

**"विनिष्पन्नसमाधिस्तु मुक्ति तत्रैव जन्मनि"** इति श्रुतिवचनानुसारेण समाधिस्थो योगी एव कैवल्याख्यां मुक्तिं प्राप्नोति। अमृतपदप्राप्तयोगिनः कृत एव श्रुतिषु "न स पुनरावर्तते" इति स्पष्टं जन्ममरणनिषेधः कृतः। हठयोगशास्त्रे सुषुम्नानाडी, कैवल्यनाडी, ब्रह्मनाडी इति नामभ्याम् अभिधीयते। यथा घटभेदनेन घटस्य प्रकाशः बहिर्याति एवमेव सुषुम्ना चक्राणां भेदनेन योगिनः सूर्यद्वारेण परमपदं प्राप्नुवन्ति। एतदेव "सूर्यद्वारेण ते विरजाः प्रयान्ति" इति वचनेन प्रतिपादितम्। तदनन्तरमेव योगिनः पुनर्जन्मादिकं न भवति। स च योगी ब्रह्मसायुज्यम् लभते। प्रजापतिना इन्द्रियाणि पराङ्मुखानि सृष्टानि अतः निर्विकल्पसमाधौ अमृतत्त्वप्राप्त्यर्थं योगी सान्तःकरणानि इन्द्रियाणि प्रत्याहृत्य तदनन्तरं तेषां वशीकरणे जाते एव प्रत्यगात्मानं पश्यति।

योगसाधनायां योगी हृत्प्रदेशे मनोनिरूद्धय अमनिभावार्थं यतते। यतोहि मनसः निष्क्रियता निश्चलता एव मनोन्मनिभावः मोक्षावस्था च वर्तते। गुह्यं ब्रह्मतत्त्वं ज्ञानचक्षुषा एव द्रष्टुं शक्यते। धीरं योगिनं पुरुषं सुखदुःखादयः न पीडयन्ति। यतः स अमृतपदस्याधिकारी भवति। यदि योगिना समाध्यावस्था लभ्यते तर्हि एतादृशः योगी महता दुःखेनापि न परिचाल्यते। समाधिलाभात् श्रेष्ठः नान्यत् कोऽपि लाभः। समाधौ एव श्रीमद्भगवद्गीतोक्तनिस्त्रैगुण्यस्थितिलाभः भवति। स च योगसाधनाया एव लभ्यते। एतादृशीमवस्थां प्राप्य एव योगीजन्ममृत्युजराव्याधिभिः विमुक्तो जायते अमृतपदवीं च लभते।

**गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान्।**

**जन्ममृत्युजरादु:खैर्विमुक्तोऽमृतमश्नुते।।[26]**

तदनन्तरं तस्य पुनरावर्तनादिकं न भवति। अत एष एव दिव्यम् अविनश्वरं अमृतपदं प्राप्त्यर्थमेव योगी सततं प्रयतेत्।

[26] श्रीमद्भगवद्गीता अ. 14/20

**योगदर्शनस्य परम्परानिर्देशनम्** -

"हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः" इति व्यासभाष्योक्तं वचः प्रमाणी कुरुते यदत्र योगदर्शनमिदं सर्वतः प्राग् भगवता ब्रह्मणैव प्रवर्तितम्। भारतीयानां मनःसु योगशब्दो योगी शब्दश्च सुविशिष्टं स्थानमावहतः न केवलमेवस्मिन्नेव युगेऽपितु वैदिकयुगत एव प्रवाहोऽयं प्रचलति। भगवद्गीतायामपि लिखितमस्ति -

**द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे।**

**स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः।।**[27]

वेदेषु ब्रह्मणग्रन्थेषूपनिषत्सु चाध्यात्मविषयोऽधिदैवविषयश्चेत्युभौ केवलं योगमेवं प्रतिपादयतः। लिखितमस्ति "नायं मनसि संयच्छेत् मनो यच्छेत् तदात्मनि" इत्थमेव ईशोपनिषदि, केनोपनिषदि, कठोपनिषदि, प्रश्नोपनिषदि, ऐतरीयोपनिषदि च प्राधान्येव योगदर्शनमेव प्रतिपादितमस्ति। तैतरीयब्राह्मणोपनिषदि चापि षडङ्गानि स्वीक्रियन्ते। तत्र द्विविधो यमः, दशविधो नियमः। महाभारते पुराणेषु चापि सुविस्तृतरूपेण योगदर्शनमुपलभ्यते। राजयोगग्रन्थेषु पातञ्जलयोगदर्शनं श्रेष्ठतमं ग्रन्थरत्नं वर्त्तते।

इत्थमेव हठयोगग्रन्थेषु घरेण्डसंहिता हठयोगप्रदीपिका चेति ग्रन्थौ सुप्रसिद्धौ वर्त्तते।

**योगपरम्परा** -

परमात्मा योगशक्तया स्वमायया इमां सृष्टिं व्यरचयत्। परमात्मनः इयं योगशक्तिः शाश्वतिकी। यद्यपि सांख्ययोगमते प्रकृतिपुरुषयोः संयोगेन सृष्टिः प्रजायते। किन्तु

---

27 श्रीमद्भगवद्गीता 4/28

श्रुतिस्मृति पुराणादिमतानुसारेण परमात्मैव सृष्टेः निमित्तोपादानकारणम्। योगस्य आदि वक्ता हिरण्यगर्भः इति महाभारतयाज्ञवल्क्यस्मत्योर्वचनम्।[28]

किन्तु अयं हिरण्यगर्भः कः आसीत् इत्यत्र नैकमत्यं इतिहासकर्तृणाम्। केचन कपिलदेव एव हिरण्यगर्भः इति मन्यन्ते। महाभारतेऽपि अस्य प्रमाणं समुपलभ्यते हिरण्यगर्भविषये अन्यदपि वर्णनं प्राप्यते येन ज्ञायते विभुना परमात्मनः एव योगतत्त्वस्य प्रथमोपदेशो विहितः।

श्रीमद्भगवद्गीतायाम् अस्य दृढा स्पष्टा च परम्परा ज्ञानं लभ्यते।

**इमं विवस्वते योगं प्रोक्तवानहमव्ययम्।**

**विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्।।**[29]

तद्वचनानुसारेण भगवता विवस्वते सूर्याय अयमव्यययोगः प्रथमम् उपदिष्टः। विवस्वतः मनुना प्राप्तः। मनुः इक्ष्वाकवे इममब्रवीत्। राजर्षिष्वासीदितीति ज्ञायते।

किन्तु '**सः कालेनेह महता योगो नष्टः**' तं सः च भगवता पुनः अर्जुनं प्रति उपदिष्टः। उपनिषत्सु इतरयोगग्रन्थेषु च भगवता सदाशिवेन ब्रह्मादि देवेभ्यः पार्वत्यैः च योगोपदेशस्य प्रमाणं लभ्यते।

---

[28] (क) हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः। याज्ञवल्क्यस्मृतिः

(ख) सांख्यस्य वक्ता कपिलः परमर्षिः स उच्यते।

(ग)हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः। 12/342/96

[29] श्रीमद्भगवद्गीता 4/1

नाथयोगपरम्पराया: सदाशिवादिगुरुरस्ति। मत्स्येन्द्रनाथादि नाथसिद्धानां शक्तिस्त्रोत: सदाशिव एवेति।

भगवता महर्षिपतञ्जलिना '**अथ योगानुशासनम्**'[30] इत्यनेन योगस्य गुरुपरम्पराया: परिचयो दत्त: महर्षि: पतञ्जलि: योगसूत्रे स्वशास्त्रे योगसिद्धान्तान् सूत्रै: र्निबध्य: योगपरम्परां दृढा अक्षुण्णां च कृतवान्।

अथायं ग्रन्थं: योगदर्शनम् इति नाम्ना दर्शनेषु प्रसिद्ध: समादृत: च। प्राक्तन् कालादेव योगपरम्परां आगमनिगमभेदेन धाराद्वयेन प्रवाहिता आसीत्। आगमपरम्पराया: प्रवर्तक: भगवान सदाशिव:। इयं धारा हठयोग-तन्त्रयोग-पाशुपतयोग-सिद्धयोग नाम्ना प्रवाहिताऽभूत् अस्यां नाथसम्प्रदायस्य प्रचलनं प्रावर्तत। यस्यां मत्स्येन्द्रनाथ: गोरक्षनाथ: प्रभृतय: चतुरशीति योगिन: बभूव।

निगममार्गो वेदप्रतिपादित: मार्ग:। उपनिषद: वेदमध्यभागा: योगस्य कृते पुरा अध्यात्मविद्या पराविद्या आदि शब्द: प्रयुज्यते स्म। योग शब्दस्य स्पष्टतर: प्रयोग: आधिक्येन श्वेताश्वेतरोपनिषदि लभ्यते।

प्राचीनकालादेव कोऽधिकारी कश्चनाधिकारी इत्युभयो: विशेषविचारो विहित:। अस्मादेव कारणात् अधिकृताभावात् एषा योगपरम्परा विच्छिन्नाऽभूत। यतोहि अस्य ज्ञानस्य अधिकार: कृत एव प्रचलित आसीत्।

---

[30] पातञ्जलयोगसूत्रम् 1/2

अद्यापि अयं योगः सिद्धयोगपरम्परया सम्प्रचलति। हिमालये गुहासु समाधिलीनाः योगिनः परम्परया स्वशिष्येषु योगविद्यां प्रददति।

**श्रीकृष्णवल्लभाचार्यस्य व्यक्तित्वं कृतित्वञ्च -**

पातञ्जलयोगदर्शने "स्वामिनारायणभाष्यम्" श्रीकृष्णवल्लभाचार्यविरचित स्वामिनारायणभाष्यग्रन्थरूपेण उपलब्धमस्ति। श्रीकृष्णवल्लभाचार्यः स्वामिनारायण-सम्प्रदायस्य गुरुरासीत्। एते 1939 तमे प्रादूर्भूताः। ग्रन्थेऽस्मिन् एतेषां महापुरुषाणां परिचयः पूर्णतया न प्राप्यते। श्रीकृष्णवल्लभाचार्यः 'श्रीमद्दार्शनिकपञ्चानन-षडदर्शनाचार्य-नव्यन्यायाचार्य-सांख्ययोग-वेदान्त-मीमांसातीर्थ-पण्डित' इति उपाधिना विभूषिताः। भाष्यस्य अन्ते प्रस्तुतेन श्लोकेन एषां पुण्यतीर्थानां जीवनपरिचयः प्राप्यते, तच्चैत्थम् -

**भारते पश्चिमे प्रान्ते पुण्ये सागरसङ्गते।**
**'रैवताऽद्रि' समाधारे 'कङ्क' सौराष्ट्रविश्रुते।।1।।**
**वीरविद्वद्गणाऽऽपूर्ण-'जीर्णदुर्ग' निवासिभिः।**
**'श्रीकृष्णवल्लभाऽऽचार्यैः स्वामिनारायणाऽश्रितैः'।।2।।**
**मनांसि कुमुदानीव बोधयद्विदुषां सदा।**
**'स्वामिनारायणं' भाष्यं योगचन्द्रकरप्रभम्।।3।।**
**काश्यां मार्गे वैक्रमेऽब्देसप्ताऽष्टनिधिभूमिते।**
**विरचय्याऽर्पितं यत्र भगवान् स प्रसीदतु।।4।।**[31]

---

[31] योगदर्शनस्वामिनारायणभाष्यम् पृ. 324

श्रीकृष्णवल्लभाचार्यस्य भाष्यं विशिष्टतममस्ति यत् आचार्यः भाष्ये पूर्वपक्षरूपेण अन्येषां भारतीयदार्शनिकमतानां उपस्थापनम् उत्तरपक्षे योगसिद्धान्तानां प्रतिपादनं कृतमस्ति। इदं भाष्यं पठित्वा विदितं भवति यत् भाष्यकारस्य पारङ्गता अन्येषु दर्शनेष्वपि तादृशः वर्त्तते: यथा पातञ्जलयोगे। अनेन अस्य स्वामिनारायणभाष्यस्य सार्थकता, भाष्यगतविषयस्य स्पष्टता गाम्भीर्यं च सूच्यते। अत्र भाष्येऽस्मिन् वैशिष्ट्यमस्ति, यत् प्रतिसूत्रं ईश्वरप्रेरितमस्ति, अत्र भक्तिमार्गः प्राधान्यः, सर्वं कार्यं ईश्वरार्पणं, ईश्वरप्रणिधानं करणीयमिति उपदिष्टम्।